मलक्लेदसत् स्वादु ग्राहि त्वग्दोषहृत् व्रणम् ।
वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे ॥
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥*॥
अथ वरटतैलगुणाः ।
कुसुम्भतैलमम्लं स्वादुष्णं गुरु विदाहि च ।
चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम् ॥ * ॥
अथ खाखसबीजतैलगुणाः ।
तैलं खाखसबीजानां बल्यं वृष्यं गुरु स्मृतम् ।
वातहृत् कफहृच्छीतं स्वादुपाकरसञ्च तत् ॥*॥
अथ एरण्डतैलगुणाः ।
एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु ।
वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् ॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् ।
विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ॥
विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलहृत् ।
हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान् ॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन् ।
आमवातगजेन्द्रस्य शरीरवनचारिणः ।
एक एव निहन्तायमेरण्डस्नेहकेशरी ॥ * ॥
अथ राजतैलगुणाः ।
तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम् ।
कुष्ठपामाक्रमिहरं वातश्लेष्मामयापहम् ॥ * ॥
अथ सर्व्वतैलगुणाः ।
तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम् ।
अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥
इति भावप्रकाशे तैलवर्गः ॥ * ॥
अथ पुराणतैलगुणाः ।
“यामं कल्ककषायवीर्य्यमखिलं पर्णञ्च पत्त्रत्रयं
पक्षमासान् घृतमोदकौ सहगुडौ मासत्रयं गुग्गुलोः ।
सिद्धानां रसभस्मनां सुविपुलं वीर्य्यन्तु वर्षत्रयं
किञ्चिन्न्यूनविवर्ज्जितं गुणपरं तैलं पुराणं महत् ॥”
इति नारायणदासकृतपरिभाषा ॥

तैलकं, क्ली, (स्वल्पं तैलम् । अल्पार्थे कन् ।) अल्पपरिमाणतैलम् । इति व्याकरणम् ॥

तैलकन्दः, पुं, (तैलप्रधानः कन्दः ।) कन्दविशेषः । तत्पर्य्यायः । द्रावककन्दः २ तिलाङ्कितदलः ३ करवीरकन्दसंज्ञः ४ तिलचित्रपत्रकः ५ । अस्य गुणाः । लोहद्रावित्वम् । कटुत्वम् । उष्णत्वम् । वातापस्मारविषशोफनाशित्वम् । रसस्य बन्धकारित्वम् । देहसिद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

तैलकारः, पुं, (तैलं करोतीति । कृ+“कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) वर्णसङ्करजातिविशेषः । कलु इति भाषा । स कोटकस्त्रीगर्भे कुम्भकाराज्जातः । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ तत्पर्य्यायः । घूसरः २ चाक्रिकः ३ तैली ४ । इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । ५६२ ।
“स्नेहमयान् पीडयतः किं चक्रेणापि तैलकारस्य ।
चालयति पार्थिवानपि यः स कुलालः परं चक्री ॥”
यात्राकालेऽस्य दर्शनममङ्गलसूचकम् । यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये ।
“ददर्शामङ्गलं राजा पुरी वर्त्मनि वर्त्मनि ॥”
“कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ॥”)

तैलकिट्टं, क्ली, (तैलस्य किट्टं मलम् ।) तैलमलम् । खलि इति ख्यातम् । तत्पर्य्यायः । पिण्याकः २ खलिः ३ तैलकल्कजः ४ । अस्य गुणाः । कटुत्वम् । गौल्यत्वम् । कफवातप्रमेहनाशित्वञ्च । इति राजनिर्घण्टः ॥

तैलङ्गः, पुं, देशविशेषः । इति शब्दरत्नावली ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम् ।
“श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः ।
तैलङ्गदेशो देवेशि ! ध्यानाध्ययनतत्परः ॥”)

तैलचौरिका, स्त्री, (तैलस्य चौरिकेव । चौरवत् तैलपानादस्यास्तथात्वम् ।) तैलपायिका । इति शब्दरत्नावली ॥

तैलद्रोणी, स्त्री, (तैलपूर्णा द्रोणी ।) कण्ठपर्य्यन्तमज्जनार्थतैलपूर्णकाष्ठादिनिर्म्मितपात्रविशेषः । तत्रावस्थितिगुणाः । वातरोगवाकुष्ठरोगपङ्गुवाधिर्य्यमिन्मिनगद्गदधन्वङ्गस्वप्नपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्त्रकत्र्यवधिरभवमूत्रकृच्छ्रवस्तिरोगेषु प्रशस्तत्वम् । इति राजवल्लभः ॥

तैलपर्णकं, क्ली, (तैलं तैलयुक्तमिव पर्णमस्य । कप् ।) ग्रन्थिपर्णवृक्षः । इति भावप्रकाशः ॥

तैलपर्णिकं, क्ली, (तैलयुक्तं पर्णमस्त्यस्य । यद्वा, तिलपर्णी वृक्ष उत्पत्तिस्थानत्वेनास्त्यस्येति । ठन् ।) हरिचन्दनम् । इत्यमरः । २।६।१३१ ॥ चन्दनविशेषः । तत्तु तिलपर्णवृक्षजातं धवलं सुशीतलम् । इति भरतः ॥ (अस्य पर्य्यायः यथा,
“श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
वृक्षविशेषे, पुं । यथा, हरिवंशे । २२३ । ६८ ।
“कदम्बाश्चैव भव्याश्च दाडिमा वीजपूरकाः ।
कालीयका दुकूलाश्च हिङ्गवस्तैलपर्णिकाः ॥”)

तैलपर्णी, स्त्री, (तिलपर्णी वृक्षे जातः । “तत्र जातः ।” ४ । ३ । २५ । इत्यण् ततो ङीप् ।) चन्दनम् । श्रीवासः । (पर्य्यायोऽस्या यथा,—
“तैलपर्णी दधित्याख्यः पिण्याको रक्तशीर्षकः ।
वेष्टो रसाङ्कः श्रीवासः श्रीपिष्टसरलद्रवौ ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सिह्लकः । इति मेदिनी । णे, ६६ ॥

तैलपा, स्त्री, (तैलं पिबतीति । पा पाने+“आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) तैलपायिका । इति राजनिर्घण्टः ॥

तैलपायिका, स्त्री, (तैलं पिबतीति । पा+ण्वुल् । टापि अत इत्वम् ।) कीटविशेषः । तेलापोका इति आरसुला इति च भाषा । तत्पर्य्यायः । पयोष्णी २ । इत्यमरः । २ । ५ । २६ ॥ तैलचौरिका ३ । इति शब्दरत्नावली ॥ तैलपा ४ । इति राजनिर्घण्टः ॥ तैलाम्बुका ५ खलाधारा ६ । इति जटाधरः ॥ (यथा, महाभारते । १३ । १०४ । १११ ।
“गृहे पारावता धन्याः शुकाश्च सहसारिकाः ।
गृहेष्वेते न पापाय तथा वै तैलपायिकाः ॥”)

तैलपिपीलिका, स्त्री, (तैलप्रिया पिपीलिका ।) पिपीलिकाभेदः । तत्पर्य्यायः । उदक्या २ कपिजाङ्घिका ३ । इति राजनिर्घण्टः ॥

तैलफलः, पुं, (तैलप्रधानं फलं यस्य ।) इङ्गुदी । विभीतकः । इति राजनिर्घण्टः ॥

तैलभाविनी, स्त्री, (तैलं भावयति सद्गन्धं करोतीति । भू+णिच्+णिनि+ङीप् ।) जातीपुष्पवृक्षः । इति राजनिर्घण्टः ॥

तैलमाली, स्त्री, (तैलानां माला सम्बन्धो यत्र । ततो गौरादित्वात् ङीष् ।) वर्त्तिः । इति शब्दमाला ॥

तैलम्पाता, स्त्री, (तिलपातोऽस्यां वर्त्तते । “घञः साऽस्यां क्रियेति ञः ।” ४ । २ । ५८ । इति ञः । “श्येनतिलस्य पाते ञे ।” ६ । ३ । ७१ । इति मुम् ।) स्वधा । तिलपातोऽस्यां स्वधायां सा । इति लिङ्गादिसंग्रहे अमरभरतौ ॥

तैलसाधनं, क्ली, (तैलं साधयति निष्पादयति सुगन्धीकरोतीति । साध+णिच्+ल्युः ।) गन्धद्रव्यविशेषः । काकला इति भाषा । तत्पर्य्यायः । काकोलम् २ कोलकम् ३ गन्धव्याकुलम् ४ ककोलकम् ५ कोषफलम् ६ । इति शब्दचन्द्रिका ॥

तैलस्फटिकः, पुं, (तैलाक्तः स्फटिक इव । स्वच्छत्वात् तथात्वम् ।) हृष्यमणिः । इति हेमचन्द्रः । ४ । १३४ ॥

तैलागुरु, क्ली, (तैलाक्तमिव अगुरु ।) दाहागुरु । इति राजनिर्घण्टः ॥

तैलाटी, स्त्री, (तैलेन तैलप्रदानेन अटति दूरीभवतीति । अट गतौ+अच्+गौरादित्वात् ङीष् ।) वरटा । इति हेमचन्द्रः । ४।२८१ ॥

तैलाम्बुका, स्त्री, (तैलं अम्बु जलमिव पेयं यस्याः । कप् । टाप् च ।) तैलपायिका । इति जटाधरः ॥

तैलिकः, पुं, (तैलं पण्यत्वेनास्त्यस्य । तैल+ठन् ।) तैलकारः । इति व्याकरणम् ॥ (अस्य अपाङ्क्तेयत्वमुक्तम् । यथा, मनुः । ३ । १५८ ।
“समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥”)

तैलिनी, स्त्री, (तैलं भक्ष्यत्वेन आश्रयत्वेन वा अस्त्यस्येति । तैल+इनि+ङीप् ।) कीटभेदः । तत्पर्य्यायः । तैलकीटः २ षड्बिन्दुः ३ दद्रुनाशिनी ४ । इति राजनिर्घण्टः ॥ दशावर्त्तिः । इति शब्दमाला ॥

तैलिशाला, स्त्री, (तैलिनस्तिलसम्बन्धिनस्तैलकारस्य वा शाला गृहम् ।) यन्त्रगृहम् । इति हेमचन्द्रः । ४ । ६३ ॥ घाणिघर इति भाषा ॥

तैली, [न्] पुं, (तैलं निष्पाद्यत्वेन पण्यत्वेन वाऽस्त्यस्येति । तैल+इनिः ।) तैलकारः । इति हेमचन्द्रः । ३ । ५८३ ॥ तैलसम्बन्धिनि, त्रि ॥